TECHE
UDINE

MANOSCRITTI

FONDO PRINCIPALE

Manoscritto n. **P_MSS_4322**

Nel Fondo Principale sono confluiti la maggior parte dei lasciti manoscritti pervenuti alla Biblioteca Civica «Vincenzo Joppi» nel corso del tempo: si tratta perciò di un fondo composito nel quale è possibile trovare manoscritti di argomento liturgico, scientifico, giuridico, botanico e altro.

Collocazione:

Biblioteca Civica "Vincenzo Joppi", Udine
https://www.techeudine.it/fondo-principale
https://www.sbhu.it/

॥ ऐंदय॥ श्रीसद्गुरुभ्योनमः॥ नमो अरिहंताणं। नमो सिद्धाणं। नमो आयरिआणं। नमो उव
ज्झायाणं नमो लोए सव्वसाहूणं। एसो पंचनमुक्कारो सव्वपावप्पणासणो। मंगलाणं च सव्वेसिं
। पढमं हवइ मंगलं ॥ इति नमस्कारसूत्र॥ इच्छामि खमासमणो। वंदिउं जावणिज्जाए। निसी
हिआए। मत्थएण वंदामि॥ २॥ इति क्षमाश्रमणसूत्र॥ इछकार सगवन् पसागरी। सोरा
ई सोदेवसी सुखतपसरीर निराबाद सुखसंजमयात्रा निरवहोछोजी स्वामी साता समाधि दे
व गुरुप्रसाद। सातपाणीरो लाभदेज्योजी॥ ३॥ इछाकारेण संदिसह भगवन्। इरिआवहियं
पडिक्कमामि। इच्छं इच्छामि पडिक्कमिउं १ इरिआवहिआए। विराहणाए २ गमणागमणे
३ पाणक्कमणे बीअक्कमणे हरिअक्कमणे ओसाउत्तिंग पणगदग मट्टीमक्कडा संताणासंक
मणे ४ जे मे जीवा विराहिआ ५ एगिंदिआ बेइंदिआ तेइंदिआ चउरिंदिआ पंचिंदिआ ६
अभिहया वत्तिआ लेसिआ संघाइया संघट्टिआ परिआविआ किलामिआ उद्दविआ
ठाणाउठाणं संकामिआ जीविआउ ववरोविआ। तस्स मिच्छामि दुक्कडं ७॥ तस्स उत्त
रीकरणेणं पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं
निग्घायणट्ठाए ठामि काउस्सग्गं ॥८॥ अन्नत्थ ऊससिएणं नीससिएणं खासिएणं छीए

णं ऊसासिएणं उड्डुएणं वायनिसग्गेणं भमलीए पित्तमुछाए १ सुहुमेहिं अंगसंचालेहिं
सुहुमेहिं खेलसंचालेहिं सुहुमेहिं दिट्ठिसंचालेहिं २ एवमाइएहिं आगारेहिं अ
भग्गो अविराहिउ हुज्ज मे काउस्सग्गो ३ जाव अरिहंताणं भगवंताणं नमुक्कारेणं
न पारेमि ४ ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि ५ ॥छ॥ लोगस्स
उज्जोअगरे धम्मतित्थयरे जिणे अरिहंते कित्तइस्सं चउवीसंपि केवली ॥१॥ उसभमजि
अं च वंदे संभवमभिणंदणं च सुमइं च पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥२॥ सु
विहिं च पुप्फदंतं सीअल सिज्जंस वासुपुज्जं च विमलमणंतं च जिणं धम्मं संतिं च वंदामि
३ कुंथुं अरं च मल्लिं वंदे मुणिसुव्वयं नमिजिणं च वंदामि रिट्ठनेमिं पासं तह वद्धमाणं
च ४ एवं मए अभिथुआ विहुयरयमला पहीणजरमरणा चउवीसंपि जिणवरा तित्थ
यरा मे पसीअंतु ५ कित्तिअवंदिअमहिआ जे ए लोगस्स उत्तमा सिद्धा आरुग्गबो
हिलाभं समाहिवरमुत्तमं दिंतु ॥६॥ चंदेसु निम्मलयरा आइच्चेसु अहिअं पया १
सयरा सागरवरगंभीरा सिद्धा सिद्धिं मम दिसंतु ७॥ इति चउविंशतिस्तवं ॥छ॥

इच्छामि खमासमणो वंदिउं जावणिज्जाए निसीहिआए मत्थएण वंदामि ॥छ॥ इच्छाकारेण संदि
सह भगवन् चैत्यवंदन करुं ॥ इच्छं ॥ जगचिंतामणि जगनाह जगगुरु जगरक्खण जगबं
धव जगसत्थवाह जगभावविअक्खण अट्ठावयसंठविअरूव कम्मट्ठविणासण चउवीसं
पि जिणवर जयंतु अप्पडिहयसासण ॥१॥ कम्मभूमिहिं कम्मभूमिहिं पढमसंघयणि उक्को
स सत्तरिसय जिणवराण विहरंत लब्भइ नवकोडिहिं केवलीण कोडिसहस्स नवसाहु गम
मइ संपइ जिणवर वीस मुणि बिहुं कोडिहिं वरनाण समणह कोडिसहस्स दुअ थुणि
जे निच्च विहाणि २ जयउ सामी जयउ सामी रिसह सेत्तुंजि उज्जिंति पहु नेमिजिण जयउ
वीर सच्चउरिमंडण भरुअच्छिहिं मुणिसुव्वय महुरि पास दुह दुरिअखंडण अवर विदे
हि तित्थयर चउदिसि विदिसि जिं के वि तीआणागयसंपइअ वंदुं जिण सव्वे वि ३ जं किंचि
नाम तित्थं सग्गे पायालि माणुसे लोए जाइं जिणबिंबाइं ताइं सव्वाइं वंदामि ४ नमोत्थुणं
अरिहंताणं भगवंताणं १ आइगराणं तित्थयराणं सयंसंबुद्धाणं २ पुरिसुत्तमाणं पुरिस
सीहाणं पुरिसवरपुंडरीआणं पुरिसवरगंधहत्थीणं ३ लोगुत्तमाणं लोगनाहाणं लोगहि २
आणं लोगपईवाणं लोगपज्जोअगराणं ४ अभयदयाणं चक्खुदयाणं मग्गदयाणं

सरणदयाणं बोहिदयाणं ५ धम्मदयाणं धम्मदेसयाणं धम्मनायगाणं धम्मसारहीणं
धम्मवरचाउरंतचक्कवट्टीणं ६ अप्पडिहयवरनाणदंसणधराणं विअट्टछउमाणं ७ जि
णाणंजावयाणं तिन्नाणंतारयाणं बुद्धाणंबोहियाणं मुत्ताणंमोयगाणं ८ सव्वन्नूणंस
व्वदरिसीणं सिवमयलमरुअमणंतमरकयमव्वाबाह मपुणरावित्ति सिद्धिगइनामधे
यं ठाणंसंपत्ताणं नमोजिणाणं जिअभयाणं ९ जेअअईआ सिद्धाजेअभविस्संतणाग
एकालेसंपईएवट्टमाणा सव्वेतिविहेणवंदामि ॥१०॥ इतिशक्रस्तवसूत्रं॥ अरिहंत
चेइआणं करेमिकाउस्सग्गं ॥१॥ वंदणवत्तिआए पूअणवत्तिआए सक्कारवत्तिआ
ए सम्माणवत्तिआए बोहिलाभवत्तिआए निरुवसग्गवत्तिआए २ सद्धाए मेहाए धिइ
ए धारणाए अणुप्पेहाए वड्ढमाणीए ठामिकाउस्सग्गं ३ अन्नत्थऊससिएणं ॥४॥ पु
क्खरवरदीवड्ढे धायइसंडेयजंबुदीवेय भरहेरवयविदेहे धम्माइगरेनमंसामि १
तमतिमिरपडलविद्धंसणस्स सुरगणनरिंदमहियस्स सीमाधरस्स वंदे पप्फोडिअ
मोहजालस्स २ जाईजरामरणसोगपणासणस्स कल्लाणपुक्खलविसालसुहाव

२

हस्स कोदेवदाणवनरिंदगणच्चिअस्स धम्मस्ससारमुवलब्भकरेपमायं ३ सिद्धेभोपय
उ नमोजिणमएनंदीसयासंजमे देवंनागसुवन्नकिंनरगणस्सब्भूअभावच्चिए लो
गोजत्थपइट्ठिओजगमिणं तेलोक्कमच्चासुरं धम्मोवड्ढउसासओविजयउ धम्मुत्तरं व
ड्ढउ ४ सुअस्सभगवओ करेमिकाउस्सग्गं ॥ वंदणवत्तिआए० ॥ अन्नत्थऊससीए
णं० ॥५॥ सिद्धाणंबुद्धाणं पारगयाणं परंपरगयाणं लोअग्गमुवगयाणं नमोसया
सव्वसिद्धाणं १ जोदेवाणविदेवो जंदेवापंजलीनमंसंति तंदेवदेवमहीयं सिरसावंदेम
हावीरं २ इक्कोविनमुक्कारो जिणवरवसहस्सवद्धमाणस्स संसारसागराओ तारेइन
रंवनारिंवा ३ उज्जिंतसेलसिहरे दिक्खानाणंनिसीहिआजस्स तंधम्मचक्कवट्टिं अ
रिट्ठनेमिंनमंसामि ४ चत्तारिअट्ठदसदोयवंदिआ जिणवराचोवीसं परमट्ठनिट्ठिअ
ट्ठा सिद्धासिद्धिंममदिसंतु ५ इतिसिद्धस्तवसूत्रं॥ वेयावच्चगराणं संतिगराणं सम्मदि
ट्ठिसमाहिगराणं करेमिकाउस्सग्गं॥ अन्नत्थऊससीएणं०॥६॥ नमोर्हत्सिद्धा
चार्योपाध्यायसर्वसाधुभ्यः॥ संसारदावानलदाहनीरं संमोहधूलीहरणेसमीरं मा

3

यारसाद्दारुणसारसीरं नमामिवीरं गिरिसारधीरं ॥१॥ भावावनामसुरदानवमानवेन
चूलाविलोलकमलावलिमालितानि संपूरिताभिनतलोकसमीहितानि कामंनमा
मि जिनराजपदानितानि ॥२॥ बोधागाधंसुपदपदवीनीरपूराभिरामं जीवाहिंसाविरल
लहरीसंगमागाहदेहं चूलावेलंगुरुगममणीसंकुलं दूरपारं सारंवीरागम जल
निधिंसादरंसाधुसेवे ॥३॥ आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाल
झंकारारावसारामलदलकमलागारभूमीनिवासे छायासंभारसारेवरकमलकरेता
रहाराभिरामे वाणीसंदोहदेहेभवविरहवरंदेहिमेदेविसारं ॥४॥ इतिश्रीवीरस्तुति
॥छ॥ जावंतिचेइआइं उड्ढेअअहेअतिरिअलोएअ सव्वाइंताइंवंदे इहसंतोतत्थ
संताइं ॥१॥ इच्छामिखमासमणो वंदिउंजा०॥ जावंतिकेइसाहू भरहेरवयमहावि
देहेअ सव्वेसिंतेसिंपणओ तिविहेणतिदंडविरयाणं ॥१॥ नमोऽर्हत्सिद्धाचार्योपाध्या
यसर्वसाधुभ्यः ॥१॥ उवसग्गहरंपासं पासंवंदामिकम्मघणमुक्कं विसहरविसनिन्ना २

सं मंगलकल्लाणआवासं ॥१॥ विसहरफुलिंगमंतं कंठेधारेइजोसयामणुओ तस्सगहरो
गमारीदुट्ठजरांजंतिउवसामं ॥२॥ चिट्ठउदूरेमंतो तुज्झपणामोविबहुफलोहोइ नरति
रिएसुविजीवा पावंतिनदुक्खदोगच्चं ॥३॥ तुहसंमत्तेलद्धे चिंतामणिकप्पपायवब्भहि
ए पावंतिअविग्घेणं जीवाअयरामरंठाणं ॥४॥ इअसंथुओमहायस भत्तिब्भरनिब्भरे
णहिअएण तादेवदिज्जबोहिं भवेभवेपासजिणचंद ॥५॥ इतिश्रीउपसर्गहरस्तोत्रं॥
जयवीअरायजगगुरू होउममंतुहप्पभावउभयवं भवनिव्वेउमग्गाणुसारिआइट्ठ
फलसिद्धी ॥१॥ लोगविरुद्धच्चाउ गुरुजणपूआपरत्थकरणंच सुहगुरुजोगोतव्वय
णसेवणाआभवमखंडा ॥२॥ वारिज्जइजइविनिआणबंधणं वीयरायतुहसमये।
तहविममहुज्जसेवा भवेभवेतुम्हचलणाणं ॥३॥ दुक्खक्खउकम्मक्खउ समाहिमर
णंचबोहिलाभोअ संपज्जउमहएअं तुहनाहपणामकरणेणं ॥४॥ सर्वमंगलमं
गल्यं सर्वकल्याणकारणं प्रधानंसर्वधर्माणां जैनंजयतिशासनं ॥५॥ इतिप्रणिधान
सूत्रं देववंदनकसूत्राणि ॥छ॥ इच्छामिखमासमणो वंदिउं जावणिज्जाए निसिहिआ
ए अणुजाणह मेमिउग्गहं निसीही अहोकायंकायसंफासं खमणिज्जोभेकिलामो

अप्पकिलंताणं बहुसुभेणंभे दिवसोवइक्कंतो जत्ताभे जवणि ज्जंचभे खामेमिखमा
समणो देवसीअंवइक्कमं आवस्सिआए पडिक्कमामिखमासमणाणं देवसिआए आसा
यणाए तित्तीसन्नयराए जंकिंचि मिच्छाए मणदुक्कडाए वयदुक्कडाए कायदुक्कडाए
कोहाए माणाए मायाए लोभाए सव्वकालिआए सव्वमिच्छोवियाराए सव्वधम्माइक्क
मणाए आसायणाए जोमेअइयारोकओ तस्सखमासमणो पडिक्कमामि निंदामिग
रिहामि अप्पाणंवोसिरामि ॥छ॥ इतिवंदनकसूत्रं॥ इच्छाकारेणसंदिसहभगवन्
देवसिअंआलोउं इच्छं आलोएमि जोमेदेवसिओ अइयारोकओ काइओ वाइओ माण
सिओउस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अण
च्छिअव्वो असमणपाउग्गो नाणेतहदंसणेचरित्ते सुएसामाइए तिण्हंगुत्तीणंचउ
ण्हंकसायाणं पंचण्हंमहव्वयाणं छण्हंजीवनिकायाणं सत्तण्हंपिंडेसणाणं अट्ठण्हं
पवयणमाईणं नवण्हंबंभचेरगुत्तीणं दसविहेसमणधम्मे। समणाणंजोगाणंजं
खंडिअंजंविराहीअं तस्समिच्छामिदुक्कडं ॥छ॥ इच्छंसव्वस्सविदेवसिअदुच्चिंति ४

भुवंतः तुल्याभवंतिभवतोननुतेनकिंवा। भूत्याश्रितंयइहनात्मसमंकरोति ॥१०॥ दृष्ट्वा
भवंतमनिमेषविलोकनीयं। नान्यत्रतोषमुपयातिजनस्यचक्षुः। पीत्वापयःशशिकर
द्युतिदुग्धसिंधोः क्षारंजलंजलनिधेरसितुंकइच्छेत् ॥११॥ यैःशांतरागरुचिभिःपर
माणुभिस्त्वं निर्मापितस्त्रिभुवनैकललामभूत। तावंतएवखलुतेप्यणवःपृथि
व्यां। यत्तेसमानमपरंनहिरूपमस्ति ॥१२॥ वक्त्रंक्वतेसुरनरोरगनेत्रहारि। निःशेषनि
र्जितजगत्त्रितयोपमानं। बिंबंकलंकमलिनंक्वनिशाकरस्य। यद्वासरेभवतिपांडुप
लाशकल्पं ॥१३॥ संपूर्णमंडलशशांककलाकलाप। शुभ्रागुणास्त्रिभुवनंतवलं
घयंति। येसंश्रितास्त्रिजगदीश्वरनाथमेकं कस्तान्निवारयतिसंचरतोयथेष्टं ॥१४॥
चित्रंकिमत्रयदितेत्रिदशांगनाभिर्नीतंमनागपिमनोनविकारमार्गं। कल्पांतकाल
मरुताचलिताचलेन। किंमंदराद्रिशिखरंचलितंकदाचित् ॥१५॥ निर्धूमवर्त्तिरप
वर्जिततैलपूरः कृत्स्नंजगत्त्रयमिदंप्रकटीकरोषि। गम्योनजातुमरुतांचलिताचला
नां। दीपोऽपरस्त्वमसिनाथजगत्प्रकाशः ॥१६॥ नास्तंकदाचिदुपयासिनराहुगम्य।

स्पष्टीकरोषि सहसा युगपज्जगंति नांभोधरोदरनिरुद्धमहाप्रभावः सूर्यातिशायिमहिमासि
मुनींद्र लोके ॥१७॥ नित्योदयं दलितमोहमहांधकारं गम्यं न राहुवदनस्य न वारिदानां॥ वि
भ्राजते तव मुखाब्जमनल्पकांति विद्योतयज्जगदपूर्वशशांकबिंबं ॥१८॥ किं शर्वरी
षु शशिना ह्नि विवस्वता वा युष्मन्मुखेंदुदलितेषु तमस्सु नाथ निष्पन्नशालिवनशा
लिनि जीवलोके कार्यं कियज्जलधरैर्जलभारनम्रैः ॥१९॥ ज्ञानं यथा त्वयि विभाति
कृतावकाशं नैवं तथा हरिहरादिषु नायकेषु तेजः स्फुरन्मणिषु याति यथा महत्त्वं
नैवं तु काचशकले किरणाकुलेपि ॥२०॥ मन्ये वरं हरिहरादय एव दृष्टा दृष्टेषु येषु
हृदयं त्वयि तोषमेति किं वीक्षितेन भवता भुवि येन नान्यः कश्चिन्मनो हरति नाथ भ
वांतरेपि ॥२१॥ स्त्रीणां शतानि शतशो जनयंति पुत्रान् नान्या सुतं त्वदुपमं जननी
प्रसूता सर्वा दिशो दधति भानि सहस्ररश्मिं प्राच्येव दिग् जनयति स्फुरदंशुजालं
॥२२॥ त्वामामनंति मुनयः परमं पुमांसमादित्यवर्णममलं तमसः पुरस्तात् त्वा ५
मेव सम्यगुपलभ्य जयंति मृत्युं नान्यः शिवः शिवपदस्य मुनींद्र पंथाः ॥२३॥ त्वाम

व्ययं विभुमचिंत्यमसंख्यमाद्यं ब्रह्माणमीश्वरमनंतमनंगकेतुं। योगीश्वरं विदितयोग
मनेकमेकं ज्ञानस्वरूपममलं प्रवदंति संतः ॥२४॥ बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधा
त् त्वं शंकरोसि भुवनत्रयशंकरत्वात् धातासि धीर शिवमार्गविधेर्विधानात् व्यक्तं त्वमे
व भगवन् पुरुषोत्तमोसि ॥२५॥ तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ तुभ्यं नमः क्षिति
तलामलभूषणाय तुभ्यं नमस्त्रिजगतः परमेश्वराय तुभ्यं नमो जिन भवोदधिशोष
णाय ॥२६॥ को विस्मयोत्र यदि नाम गुणैरशेषैस्त्वं संश्रितो निरवकाशतया मुनीश
दोषैरुपात्तविविधाश्रयजातगर्वैः स्वप्नांतरेपि न कदाचिदपीक्षितोसि ॥२७॥ उच्चैर
शोकतरुसंश्रितमुन्मयूखमाभाति रूपममलं भवतो नितांतं स्पष्टोल्लसत्किरणमस्त
तमोवितानं बिंबं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥ सिंहासने मणिमयूखशिखाविचित्रे
विभ्राजते तव वपुः कनकावदातं बिंबं वियद्विलसदंशुलतावितानं तुंगोदयाद्रिशि
रसीव सहस्ररश्मेः ॥२९॥ कुंदावदातचलचामरचारुशोभं विभ्राजते तव वपुः क
लधौतकांतं उद्यच्छशांकशुचिनिर्झरवारिधारमुच्चैस्तटं सुरगिरेरिव शातकौंभं ॥३०॥ 6

छत्रत्रयं तव विभाति शशांककांतमुच्चैः स्थितं स्थगितभानुकरप्रतापं मुक्ताफलप्रकरजा
लविवृद्धशोभं प्रख्यापयत्त्रिजगतः परमेश्वरत्वं ॥३१॥ उन्निद्रहेमनवपंकजपुंजकांति
पर्युल्लसन्नखमयूखशिखाभिरामौ पादौ पदानि तव यत्र जिनेंद्र धत्तः पद्मानि तत्र
विबुधाः परिकल्पयंति ॥३२॥ इत्थं यथा तव विभूतिरभूज्जिनेंद्र धर्मोपदेशनवि
धौ न तथा परस्य यादृक्प्रभा दिनकृतः प्रहतांधकारा तादृक्कुतो ग्रहगणस्य वि
काशिनोपि ॥३३॥ श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनाद
विवृद्धकोपं ऐरावताभमिभमुद्धतमापतंतं दृष्ट्वा भयं भवति नो भवदाश्रितानां ॥३४
॥ भिन्नेभकुंभगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः बद्धक्रमः
क्रमगतं हरिणाधिपोपि नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥ कल्पांतकाल
पवनोद्धतवह्निकल्पं दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिंगं विश्वं जिघत्सुमिव सं ६
मुखमापतंतं त्वन्नामकीर्तनजलं शमयत्यशेषं ॥३६॥ रक्तेक्षणं समदकोकि
लकंठनीलं क्रोधोद्धतं फणिनमुत्फणमापतंतं आक्रामति क्रमयुगेन निरस्तशं

कस्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥ वल्गत्तुरंगगजगर्जितभीमनादमाजौ
बलं बलवतामपि भूपतीनां उद्यद्दिवाकरमयूखशिखापविद्धं त्वत्कीर्तनात्तम इवाशु
भिदामुपैति ॥३८॥ कुंताग्रभिन्नगजशोणितवारिवाह वेगावतारतरणातुरयोधभी
मे युद्धे जयं विजितदुर्जयजेयपक्षास्त्वत्पादपंकजवनाश्रयिणो लभंते ॥३९॥ अंभो
निधौ क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नौ रंगत्तरंगशि
खरस्थितयानपात्रास्त्रासं विहाय भवतः स्मरणाद्व्रजंति ॥४०॥ उद्भूतभीषणजलो
दरभारभुग्नाः शोच्यां दशामुपगताश्च्युतजीविताशाः त्वत्पादपंकजरजोमृतदिग्ध
देहा मर्त्या भवंति मकरध्वजतुल्यरूपाः ॥४१॥ आपादकंठमुरुशृंखलवेष्टितांगा गा
ढं बृहन्निगडकोटिनिघृष्टजंघाः त्वन्नाममंत्रमनिशं मनुजाः स्मरंतः सद्यः स्वयं विग 7
तबंधभया भवंति ॥४२॥ मत्तद्विपेंद्रमृगराजदवानलाहि संग्रामवारिधिमहोदर
बंधनोत्थं तस्याशु नाशमुपयाति भयं भियेव यस्तावकं स्तवमिमं मतिमानधीते ॥४३
॥ स्तोत्रस्रजं तव जिनेंद्र गुणैर्निबद्धां भक्त्या मया रुचिरवर्णविचित्रपुष्पां धत्ते जनो य

इह कंठगतामजस्रं तं मानतुंगमवशा समुपैति लक्ष्मीः ॥४४॥ इति श्री भक्तामर
स्तवनं समाप्तः ॥ छ ॥ ॥ अथ ॥ कल्याणमंदिरमुदारमवद्यभेदि । भीताभयप्रदम
निंदितमंघ्रिपद्मं । संसारसागरनिमज्जदशेषजंतु । पोतायमानमभिनम्य जिनेश्वरस्य
॥१॥ यस्य स्वयं सुरगुरुर्गरिमांबुराशेः स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुं तीर्थेश्व
रस्य कमठस्मयधूमकेतोस्तस्याहमेष किल संस्तवनं करिष्ये ॥२॥ युग्मं ॥ सामान्य
तोपि तव वर्णयितुं स्वरूपमस्मादृशाः कथमधीश भवंत्यधीशाः धृष्टोपि कौशिकशि
शुर्यदि वा दिवांधो रूपं प्ररूपयति किं किल घर्मरश्मेः ॥३॥ मोहक्षयादनुभवन्नपि
नाथ मर्त्यो नूनं गुणान् गणयितुं न तव क्षमेत कल्पांतवांतपयसः प्रकटोपि यस्मा
न्मीयेत केन जलधेर्ननु रत्नराशिः ॥४॥ अभ्युद्यतोस्मि तव नाथ जडाशयोपि क
र्तुं स्तवं लसदसंख्यगुणाकरस्य बालोपि किं न निजबाहुयुगं वितत्य । विस्तीर्णतां
कथयति स्वधियांबुराशेः ॥५॥ ये योगिनामपि न यांति गुणास्तवेश वक्तुं कथं भव 7
ति तेषु ममावकाशः जाता तदेवमसमीक्षितकारितेयं जल्पंति वा निजगिरा ननु

पक्षिणोपि ॥६॥ आस्तामचिंत्यमहिमा जिन संस्तवस्ते नामापि पाति भवतो भवतो जगं
ति । तीव्रातपोपहतपांथजनान्निदाघे प्रीणाति पद्मसरसः सरसोनिलोपि ॥७॥ हृद्व
र्तिनि त्वयि विभो शिथिलीभवंति जंतोः क्षणेन निबिडा अपि कर्मबंधाः सद्यो
भुजंगममया इव मध्यभागमभ्यागते वनशिखंडिनि चंदनस्य ॥८॥ मुच्यंत एव मनु
जाः सहसा जिनेंद्र । रौद्रैरुपद्रवशतैस्त्वयि वीक्षितेपि गोस्वामिनि स्फुरिततेजसि दृ
ष्टमात्रे चौरैरिवाशु पशवः प्रपलायमानैः ॥९॥ त्वं तारको जिन कथं भविनां त एव त्वामु
द्वहंति हृदयेन यदुत्तरंतः यद्वा दृतिस्तरति यज्जलमेष नूनमंतर्गतस्य मरुतः स कि
लानुभावः ॥१०॥ यस्मिन् हरप्रभृतयोपि हतप्रभावाः सोपि त्वया रतिपतिः क्षपितः 8
क्षणेन विध्यापिता हुतभुजः पयसाथ येन पीतं न किं तदपि दुर्धरवाडवेन ॥११॥
स्वामिन्ननल्पगरिमाणमपि प्रपन्नास्त्वां जंतवः कथमहो हृदये दधानाः जन्मोद
धिं लघु तरंत्यतिलाघवेन चिंत्यो न हंत महतां यदि वा प्रभावः ॥१२॥ क्रोधस्त्वया य
दि विभो प्रथमं निरस्तो ध्वस्तास्तदा बत कथं किल कर्मचौराः । प्लोषत्यमुत्र यदि वा शि

शिरापि लोके नीलद्रुमाणि विपिनानि न किं हिमानी ॥१३॥ त्वां योगिनो जिन सदा पर
मात्मरूपमन्वेषयंति हृदयांबुजकोशदेशे पूतस्य निर्मलरुचेर्यदि वा किमन्यद
क्षस्य संभवि पदं ननु कर्णिकायाः ॥१४॥ ध्यानाज्जिनेश भवतो भविनः क्षणेन देहं वि
हाय परमात्मदशां व्रजंति तीव्रानलादुपलभावमपास्य लोके चामीकरत्वमचिरा
दिव धातुभेदाः ॥१५॥ अंतः सदैव जिन यस्य विभाव्यसे त्वं भव्यैः कथं तदपि नाशय
से शरीरं एतत्स्वरूपमथ मध्यविवर्तिनो हि यद्विग्रहं प्रशमयंति महानुभावाः ॥१६॥ आ
त्मा मनीषिभिरयं त्वदभेदबुद्ध्या ध्यातो जिनेंद्र भवतीह भवत्प्रभावः पानीयमप्य
मृतमित्यनुचिंत्यमानं किं नाम नो विषविकारमपाकरोति ॥१७॥ त्वामेव वीततमसं
परवादिनोपि नूनं विभो हरिहरादिधिया प्रपन्नाः किं काचकामलिभिरीश सितोपि
शंखो नो गृह्यते विविधवर्णविपर्ययेण ॥१८॥ धर्मोपदेशसमये सविधानुभावा
दास्तां जनो भवति ते तरुरप्यशोकः अभ्युद्गते दिनपतौ समहीरुहोपि किं वा विबो ८
धमुपयाति न जीवलोकः ॥१९॥ चित्रं विभो कथमवाङ्मुखवृंतमेव विष्वक्पत

त्यविरला सुरपुष्पवृष्टिः त्वद्गोचरे सुमनसां यदि वा मुनीश गच्छंति नूनमध एव हि बंधना
नि ॥२०॥ स्थाने गभीरहृदयोदधिसंभवायाः पीयूषतां तव गिरः समुदीरयंति पीत्वा यतः परम
संमदसंगभाजो भव्या व्रजंति तरसाप्यजरामरत्वं ॥२१॥ स्वामिन्सुदूरमवनम्य समुत्पतंतो म
न्ये वदंति शुचयः सुरचामरौघाः येस्मै नतिं विदधते मुनिपुंगवाय ते नूनमूर्ध्वगतयः खलु
शुद्धभावाः ॥२२॥ श्यामं गभीरगिरमुज्ज्वलहेमरत्न सिंहासनस्थमिह भव्यशिखंडिनस्त्वां
आलोकयंति रभसेन नदंतमुच्चैश्चामीकराद्रिशिरसीव नवांबुवाहं ॥२३॥ उद्गच्छता तव
शितिद्युतिमंडलेन लुप्तच्छदच्छविरशोकतरुर्बभूव सांनिध्यतोपि यदि वा तव वीतराग
नीरागतां व्रजति को न सचेतनोपि ॥२४॥ भो भोः प्रमादमवधूय भजध्वमेन मागत्य निर्वृति
पुरीं प्रति सार्थवाहं एतन्निवेदयति देव जगत्त्रयाय मन्ये नदन्नभिनभः सुरदुंदुभिस्ते ॥
२५॥ उद्योतितेषु भवता भुवनेषु नाथ तारान्वितो विधुरयं विहताधिकारः मुक्ताकला 9
पकलितोच्छ्वसितातपत्र व्याजात्त्रिधा धृततनुर्ध्रुवमभ्युपेतः ॥२६॥ स्वेन प्रपूरितजगत्त्रय
पिंडितेन कांतिप्रतापयशसामिव संचयेन माणिक्यहेमरजतप्रविनिर्मितेन सालत्रयेण

ण भगवन्नभितो विभासि ॥२७॥ दिव्यस्रजो जिन नमत्त्रिदशाधिपानामुत्सृज्य रत्नरचितान
पि मौलिबंधान् पादौ श्रयंति भवतो यदि वा परत्र त्वत्संगमे सुमनसो न रमंत एव ॥२८॥
त्वं नाथ जन्मजलधेर्विपराङ्मुखोपि यत्तारयस्यसुमतो निजपृष्ठलग्नान् युक्तं हि पा
र्थिवनिपस्य सतस्तवैव । चित्रं विभो यदसि कर्मविपाकशून्यः ॥२९॥ विश्वेश्वरोपि जनपा
लक दुर्गतस्त्वं किं वाक्षरप्रकृतिरप्यलिपिस्त्वमीश । अज्ञानवत्यपि सदैव कथंचिदेव
ज्ञानं त्वयि स्फुरति विश्वविकासहेतुः ॥३०॥ प्राग्भारसंभृतनभांसि रजांसि रोषा । दुत्थापि
तानि कमठेन शठेन यानि छायापि तैस्तव न नाथ हता हताशो । ग्रस्तस्त्वमीभिरयमेव
परं दुरात्मा ॥३१॥ यद्गर्जदूर्जितघनौघमदभ्रभीम भ्रश्यत्तडिन्मुसलमांसलघोरधारं
दैत्येन मुक्तमथ दुस्तरवारिदध्रे तेनैव तस्य जिन दुस्तरवारिकृत्यं ॥३२॥ ध्वस्तोर्ध्वकेश
विकृताकृतिमर्त्यमुंड । प्रालंबभृद्भयदवक्त्रविनिर्यदग्निः प्रेतव्रजः प्रति भवंतमपी
रितो यः । सोस्याभवत्प्रतिभवं भवदुःखहेतुः ॥३३॥ धन्यास्त एव भुवनाधिप ये त्रि
संध्यमाराधयंति विधिवद्विधुतान्यकृत्याः भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः पाद
द्वयं तव विभो भुवि जन्मभाजः ॥३४॥ अस्मिन्नपारभववारिनिधौ मुनीश मन्ये न मे श्र

वणगोचरतां गतोसि आकर्णिते तु तव गोत्रपवित्रमंत्रे । किं वा विपद्विषधरी सविधं समेति ॥
३५॥ जन्मांतरेपि तव पादयुगं न देव मन्ये मया महितमीहितदानदक्षं तेनेह जन्मनि मुनीश
पराभवानां जातो निकेतनमहं मथिताशयानां ॥३६॥ नूनं न मोहतिमिरावृतलोचनेन पू
र्वं विभो सकृदपि प्रविलोकितोसि मर्माविधो विधुरयंति हि मामनर्थाः प्रोद्यत्प्रबंधगत
यः कथमन्यथैते ॥३७॥ आकर्णितोपि महितोपि निरीक्षितोपि नूनं न चेतसि मया वि
धृतोसि भक्त्या । जातोस्मि तेन जनबांधव दुःखपात्रं यस्मात्क्रियाः प्रतिफलंति न भावशून्याः
॥३८॥ त्वं नाथ दुःखिजनवत्सल हे शरण्य । कारुण्यपुण्यवसते वशिनां वरेण्य भक्त्या न
ते मयि महेश दयां विधाय । दुःखांकुरोद्दलनतत्परतां विधेहि ॥३९॥ निःसंख्यसारशर
णं शरणं शरण्यमासाद्य सादितरिपु प्रथितावदातं त्वत्पादपंकजमपि प्रणिधानवंध्यो व
ध्योस्मि चेद्भुवनपावन हा हतोस्मि ॥४०॥ देवेंद्रवंद्य विदिताखिलवस्तुसार संसारता
रक विभो भुवनाधिनाथ त्रायस्व देव करुणाह्रद मां पुनीहि । सीदंतमद्य भयदव्यसनांबु
राशेः ॥४१॥ यद्यस्ति नाथ भवदंघ्रिसरोरुहाणां भक्तेः फलं किमपि संततसंचितायाः । तन्मे

त्वदेकशरणस्य शरण्य भूयाः स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥४२॥ इत्थं समाहितधियो
विधिवज्जिनेन्द्र सान्द्रोल्लसत्पुलककंचुकितांगभागाः त्वद्बिंबनिर्मलमुखांबुजबद्धलक्षा
ये संस्तवं तव विभो रचयंति भव्याः ॥४३॥ जननयनकुमुदचंद्र प्रभास्वराः स्वर्गसंपदो भु
क्त्वा ते विगलितमलनिचया अचिरान्मोक्षं प्रपद्यंते ॥४४॥ इति श्रीकल्याणमंदि
रस्तवनं संपूर्णं ॥ छ ॥ ॐ नमः पार्श्वनाथाय विश्वचिंतामणीयते ह्रीं धरणेंद्रवैरोट्या
पद्मादेवीयुताय ते ॥१॥ शांतितुष्टिमहापुष्टि धृतिकीर्ति विधायिने ॐ ह्रीं द्विड्व्यालवे
ताल सर्वाधिव्याधिनाशिने ॥२॥ जयाजिताख्या विजया ख्यापराजितयान्वितः दि
शां पालैर्ग्रहैर्यक्षै विद्यादेवीभिरन्वितः ॥३॥ ॐ ह्रीं असिआउसाय नमः तत्र त्रैलो
क्यनाथतां चतुःषष्टिसुरेंद्रास्ते भासंते छत्रचामरैः ॥४॥ श्रीसंखेश्वरमंडन पार्श्वजि
न प्रणत कल्पतरुकल्प चूरय दुष्टव्रातं पूरय मे वांछितं नाथ ॥५॥ इति श्रीसंखेश्व
र पार्श्वजिनस्तवनं ॥ छ ॥ ऐं नमः अजिअं जिअसव्वभयं संतिं च पसंतसव्वगयपावं 10
जयगुरु संतिगुणकरे दो वि जिणवरे पणिवयामि ॥१॥ गाहा ॥ ववगयमंगुलभावे ते

हं विउलतवनिम्मलसहावे निरुवममहप्पभावे थोसामि सुदिट्ठसब्भावे ॥२॥ गाहा ॥ सव्वदु
क्खप्पसंतीणं सव्वपावप्पसंतिणं सया अजिअसंतीणं नमो अजिअसंतिणं ॥३॥ सिलोगो ॥
अजिअजिण सुहप्पवत्तणं तव पुरिसुत्तम नामकित्तणं तह य धिइमइप्पवत्तणं तव य जि
णुत्तम संति कित्तणं ॥४॥ मागहिया ॥ किरियाविहिसंचियकम्मकिलेसविमुक्खयरं अ
जिअं निचियं च गुणेहिं महामुणिसिद्धिगयं अजिअस्स य संति महामुणिणो वि अ संतिकरं
सययं मम निव्वुइकारणयं च नमंसणयं ॥५॥ आलिंगणयं ॥ पुरिसा जइ दुक्खवारणं
जइ य विमग्गह सुक्खकारणं अजिअं संतिं च भावओ अभयकरे सरणं पवज्जहा ॥६॥ मा
गहिआ ॥ अरइरइतिमिरविरहिअमुवरयजरमरणं सुरअसुरगरुलभुयगवइप
ययपणिवइयं अजिअमहमवि अ सुनयनयनिउणमभयकरं सरणमुवसरिअ भु
वि दिविजमहिअं सययमुवणमे ॥७॥ संगययं ॥ तं च जिणुत्तममुत्तमनित्तमसत्तधरं अ
ज्जवमद्दवखंतिविमुत्तिसमाहिनिहिं संतिकरं पणमामि दमुत्तमतित्थयरं संतिमुणी मम
संतिसमाहिवरं दिसउ ॥८॥ सोवाणयं ॥ सावत्थि पुव्वपत्थिवं च वरहत्थि मत्थयपसत्थवि

छिन्नसंसियं थिरसरिसवच्छं मयगललीलायमाणवरगंधहत्थिपत्थाणपत्थिअं संथवा
रिहं हत्थिहत्थबाहुं धंतकणगरुयगनिरुवहयपिंजरं पवरलक्खणोवचिअ सोमचारुरूवं
सुइसुहमणाभिराम परमरमणिज्ज वरदेवदुंदुहि निनायमहुरयर सुहगिरं ॥९॥
वेढओ ॥ अजिअं जिआरिगणं जिअसव्वभयं भवोहरिउं पणमामि अहं पयओ पावं
पसमेउमे भयवं ॥१०॥ रासालुद्धओ ॥ कुरुजणवय हत्थिणाउर नरीसरो पढमं तओ महा
चक्कवट्टिभोए महप्पभावो जो बावत्तरि पुरवरसहस्स वरनगर निगम जणवयवई ब
त्तीसारायवरसहस्साणुआयमग्गो चउदसवररयण नवमहानिहि चउसट्ठिसह
स्स पवरजुवईण सुंदरवई चुलसीहयगयरहसयसहस्ससामी छन्नवइगामकोडि
सामी आसी जो भारहंमि भयवं ॥११॥ वेढओ ॥ तं संतिं संतिकरं संतिन्नं सव्वभया संतिं थु
णामि जिणं संतिं विहेउ मे सयवं ॥१२॥ रासानंदियं ॥ इक्खाग विदेह नरीसर नरव
सह मुणिवसहा नवसारयससिसकलाणण विगयतमा विहुअरया अजिउत्तम
तेअगुणेहिं महामुणि अमिअबला विउलकुला पणमामि ते भवभयमूरण जग
सरणा मम सरणं ॥१३॥ चित्तलेहा ॥ देवदाणविंदचंदसूरवंदहट्ठतुट्ठजिट्ठपरम लट्ठरूव धंतरुप्पप
ट्टसेयसुद्धनिद्धधवल दंतपंति संति सत्तिकित्तिमुत्तिजुत्तिगुत्तिपवर दित्ततेयवंदधेयसव्वलोयभावि
अप्पभावणेअ पइसमे समाहिं ॥१४॥ नारायओ ॥ विमलससिकलाइरेअसोमं वितिमिरसूर
कराइरेअतेअं तियसवइगणाइरेअरूवं धरणिधरप्पवराइरेअसारं ॥१५॥ कुसुमलया ॥ सत्ते अ
सया अजिअं सारीरे अ बले अजिअं तवसंजमे अ अजिअं एस थुणामि जिणं अजिअं ॥१६॥
भुअगपरिरिंगियं ॥ सोमगुणेहिं पावइ न तं नवसरयससी तेअगुणेहिं पावइ न तं नवसरयरवी
रूवगुणेहिं पावइ न तं तिअसगणवई सारगुणेहिं पावइ न तं धरणिधरवई ॥१७॥ खिज्जियं ॥
तित्थवरपवत्तयं तमरयरहिअं धीरजणथुयच्चिअं चुअकलिकलुसं संतिसुहपवत्तयं
तिगरणपयओ संतिमहं महामुणिं सरणमुवणमे ॥१८॥ ललिअं ॥ विणओणयसिररइअं
जलि रिसिगणसंथुअं थिमिअं विबुहाहिवधणवइनरवइथुयमहिअच्चिअं बहुसो
अइरुग्गयसरयदिवायरसमहिअसप्पभं तवसा गयणंगणवियरणसमुइयचारणवं
दिअं सिरसा ॥१९॥ किसलयमाला ॥ असुरगरुलपरिवंदिअं किन्नरोरगनमंसिअं देवकोडि

सयमंथुअं समणसंघपरिवंदिअं ॥२१॥ समुहं अभयं अणहं अरयं अरुअं अजिअं अ
जिअं पयउपणमे ॥२२॥ विज्जुविलसियं ॥ आगयावरविमाणदिव्वकणगरहतुरयपह
करसएहिं हुलिअं ससंभमोअरणखुभिअलुलिअचलकुंडलंगयतिरीडसोहंतमउ
लिमाला ॥२३॥ वेड्ढओ ॥ जं सुरसंघा सासुरसंघा वेरविउत्ता भत्तिसुजुत्ता आयरभूसि
असंभमपिंडिअ सुट्ठुसुविम्हिअसव्वबलोघा उत्तमकंचणरयणपरूविअ भासुरभू
सणभासुरिअंगा गायसमोणयभत्तिवसागयपंजलिपेसिअसीसपणामा ॥२४॥ रयण
मालो ॥ वंदिऊण थोऊण तो जिणं तिगुणमेव य पुणो पयाहिणं पणमिऊण य जि
णं सुरासुरा पमुइया सभवणाइं तो गया ॥२५॥ खित्तयं ॥ तं महामुणिमहं पि पंजली
रागदोसभयमोहवज्जिअं देवदाणवनरिंदवंदिअं संतिमुत्तमं महातवं नमे ॥२६॥ खि
त्तयं ॥ अंबरंतरविआरणिआहिं ललिअहंसवहुगामिणिआहिं पीणसोणिथणसा
लिणिआहिं सकलकमलदललोयणिआहिं ॥२७॥ दीवयं ॥ पीणनिरंतरथणभरवि
णमियगायलयाहिं मणिकंचणपसिढिलमेहलसोहियसोणितडाहिं वरखिंखि १२

णिनेउरसतिलयवलयविभूसणिआहिं रइकरचउरमणोहरसुंदरदंसणिआहिं ॥२८॥
॥ चित्तक्खरा ॥ देवसुंदरीहिं पायवंदियाहिं वंदिआ जस्स ते सुविक्कमा कमा ॥ अप्पणो
निडालएहिं मंडणोड्डणप्पगारएहिं केहिं केहिं वि अवंगतिलयपत्तलेहनामएहिं चिल्लए
हिं संगयंगयाहिं भत्तिसंनिविट्ठवंदणागयाहिं हुंति ते वंदिया पुणो पुणो ॥२९॥ नाराय
ओ ॥ तमहं जिणचंदं अजिअं जिअमोहं धुयसव्वकिलेसं पयओ पणमामि ॥३०॥ नंदिअयं ॥
थुअवंदिअस्सा रिसिगणदेवगणेहिं तो देववहूहिं पयओ पणमिअस्सा जस्स जगुत्तम
सासणयस्सा भत्तिवसागयपिंडियाहिं देववरच्छरसाबहुआहिं सुरवररइगुणपंडि
ययाहिं ॥३१॥ भासुरयं ॥ वंससद्दतंतितालमेलिए तिउक्खराभिरामसद्दमीसए कए य सु
इसमाणणे अ सुद्धसज्जगीअ पायजालघंटिआहिं वलयमेहलाकलावनेउराभिराम
सद्दमीसए कए अ देवनट्टिआहिं हावभावविब्भमप्पगारएहिं नच्चिऊण अंगहारएहिं वं
दिआ य जस्स ते सुविक्कमा कमा तयं तिलोयसव्वसत्तसंतिकारयं पसंतसव्वपावदोसमेस
हं नमामि संतिमुत्तमं जिणं ॥३२॥ नारायओ ॥ छत्तचामरपडागजूअजवमंडिआ झयव

रसमगरुरयमिसियउअं भं तेतला दीवसमुद्दे मंदर दिसागयसोहिया। सत्थीयवसहसीह
क रहचक्कवरंकिया ॥३२॥ ललियं ॥ सहावलट्ठा समप्पइट्ठा अदोसदुट्ठा गुणेहिं जिट्ठा पसा
यसिट्ठा तवेण पुट्ठा सिरीहिं इट्ठा रिसीहिं जुट्ठा ॥३३॥ वाणवासिया ॥ ते तवेण धुअसव्वपाव
या सव्वलोअहिअमूलपावया संथुया अजिअसंतिपायया हुंतु मे सिवसुहाण दायया
॥३४॥ अपरांतिका ॥ एवं तववलविउलं थुअं मए अजिअसंतिजिणजुअलं ववगयक
म्मरयमलं गइं गयं सासयं विउलं ॥३५॥ गाहा ॥ तं बहुगुणप्पसायं मुक्खसुहेण परमेण
अविसायं नासेउ मे विसायं कुणउ अ परिसा वि अ प्पसायं ॥३६॥ गाहा ॥ तं मोएउ अ नंदि
पावेउ अ नंदिसेणमभिनंदिं परिसा वि अ सुहनंदिं मम य दिसउ संजमे नंदिं ॥३७॥ गाहा
॥ पक्खियचाउम्मासिअ संवछरिए अवस्स भणियव्वो। सोयव्वो सव्वेहिं उवसग्गनिवा
रणो एसो ॥३८॥ जो पढइ जो अ निसुणइ उभओ कालं पि अजिअसंतिथयं न हु हुंति
तस्स रोगा पुव्वुप्पन्ना विनासंति ॥३९॥ जइ इच्छह परमपयं अहवा कित्तिं सुवित्थडं भुवणे
ता तेलुक्कुद्धरणे जिणवयणे आयरं कुणह ॥४०॥ इति श्री अजितशांतिस्तवनं श्रीनंदि १३
षेणविरचितं इदं स्तोत्रं ॥छ॥ एर्द्रं ॥ भो भो भव्याः शृणुत वचनं प्रस्तुतं सर्वमेतत् ये यात्रा

यां त्रिभुवनगुरोरार्हता भक्तिभाजः तेषां शांतिर्भवतु भवतामर्हदादिप्रभावादारोग्यश्रीधृतिमति
करी क्लेशविध्वंसहेतुः ॥१॥ भो भो भव्यलोका इह हि भरतैरावतविदेहसंभवानां समस्ततीर्थक
तां जन्मन्यासनप्रकंपानंतरमवधिना विज्ञाय सौधर्माधिपतिः सुघोषाघंटाचालनानंतरं स
कलसुरासुरेंद्रैः सह समागत्य सविनयमर्हद्भट्टारकं गृहीत्वा गत्वा कनकाद्रिशृंगे विहित
जन्माभिषेकः शांतिमुद्घोषयति यथा ततोऽहं कृतानुकारमिति कृत्वा महाजनो येन गतः
स पंथा इति भव्यजनैः सह समेत्य स्नात्रपीठे स्नात्रं विधाय शांतिमुद्घोषयामि तत्पूजा
यात्रास्नात्रादिमहोत्सवानंतरमिति कृत्वा कर्णं दत्वा निशम्यतां २ स्वाहा ॥ ॐ पुण्याहं २ प्रीय
तां २ भगवंतोऽर्हंतः सर्वज्ञाः सर्वदर्शिनः त्रिलोकनाथास्त्रिलोकमहितास्त्रिलोकपूज्याः
स्त्रिलोकेश्वरास्त्रिलोकोद्योतकराः ॐ ऋषभ १ अजित संभव अभिनंदन सुमति पद्मप्र
भ सुपार्श्व चंद्रप्रभ सुविधि शीतल श्रेयांस वासुपूज्य विमल अनंत धर्म शांति कुंथु अर
मल्लि मुनिसुव्रत नमि नेमि पार्श्व वर्द्धमानांता जिनाः शांताः शांतिकरा भवंतु स्वाहा ॐ मुनयो
मुनिप्रवरा रिपुविजयदुर्भिक्षकांतारेषु दुर्गमार्गेषु रक्षंतु वो नित्यं स्वाहा ॐ श्री ह्री धृति मति

श्री ह्रीं कांति बुद्धि लक्ष्मी मेधा विद्या साधन प्रवेश निवेशनेषु सुगृहीतनामानो जयंति ते जिनें
द्राः ॐ रोहिणी प्रज्ञप्ती वज्रशृंखला वज्रांकुशी अप्रतिचक्रा पुरुषदत्ता काली महाकाली
गौरी गांधारी सर्वास्त्रा महाज्वाला मानवी वैरोट्या अछुप्ता मानसी महामानसी षोडशविद्या
देव्यो रक्षंतु वो नित्यं स्वाहा ॥ ॐ आचार्योपाध्याय प्रभृति चातुर्वर्णस्य श्रीश्रमणसंघस्य शां
तिर्भवतु ॐ तुष्टिर्भवतु ॐ पुष्टिर्भवतु ॐ ग्रहाश्चंद्र सूर्यांगारक बुध बृहस्पति शुक्र शने
श्चर राहु केतु सहिताः सलोकपालाः सोम यम वरुण कुबेर वासवादित्य स्कंद विना
यकोपेताः ये चान्येपि ग्राम नगर क्षेत्र देवतादयस्ते सर्वे प्रीयंतां २ अक्षीणकोशको
ष्ठागारा नरपतयश्च भवंतु स्वाहा ॐ पुत्र मित्र भ्रातृ कलत्र सुहृत् स्वजन संबंधि
बंधुवर्गसहिताः नित्यं चामोदप्रमोदकारिणः अस्मिंश्च भूमंडलायतन निवासि
ले साधु साध्वी श्रावक श्राविकाणां रोगोपसर्ग व्याधि दुःख दुर्भिक्ष दौर्मनस्योपशमना
यं शांतिर्भवतु ॐ तुष्टि पुष्टि ऋद्धि वृद्धि मांगल्योत्सवाः सदा प्रादुर्भूतानि पा
पानि शाम्यंतु दुरितानि शत्रवः पराङ्मुखा भवंतु स्वाहा श्रीमते शांतिनाथाय नमः २४
शांति विधायिने त्रैलोक्यस्यामराधीश मुकुटाभ्यर्चितांघ्रये ॥१॥ शांतिः शांतिकरः श्री

मान् शांतिं दिशतु मे गुरुः शांतिरेव सदा तेषां येषां शांतिर्गृहे गृहे ॥२॥ उन्मृष्ट रिष्ट दुष्ट ग्रह गति दुः
स्वप्न दुर्निमित्तादि संपादित हित संपन्नामग्रहणं जयति शांतेः ॥३॥ श्रीसंघ जगज्जनपद राजा
धिप राजसंनिवेशानां गोष्ठिक पुरमुख्याणां व्याहरणैर्व्याहरेच्छांतिं ॥४॥ श्रीश्रमणसंघस्य
शांतिर्भवतु श्रीजनपदानां शांतिर्भवतु श्रीराजाधिपानां शांतिर्भवतु श्रीराजसंनिवेशानां
शांतिर्भवतु श्रीगोष्ठिकानां शांतिर्भवतु श्रीपौरजनस्य शांतिर्भवतु श्रीब्रह्मलोकस्य शांति
र्भवतु श्रीगच्छाधिपानां शांतिर्भवतु ॐ स्वाहा ॐ श्रीपार्श्वनाथाय स्वाहा एषा शांतिः प्रतिष्ठा
यात्रा स्नात्राद्यवसानेषु शांतिकलशं गृहीत्वा कुंकुमचंदन कर्पूरागुरु धूपवास कुसुमांज
लिसमेतः स्नात्रचतुष्किकायां श्रीसंघसमेतः शुचिशुचिवपुः पुष्पवस्त्र चंदनाभरणालंकृतः
पुष्पमालां कंठे कृत्वा शांतिमुद्घोषयित्वा शांतिपानीयं मस्तके दातव्यमिति नृत्यंति
नृत्यं मणिपुष्पवर्षं सृजंति गायंति च मंगलानि स्तोत्राणि गोत्राणि पठंति मंत्रान् कल्या 15
णभाजो हि जिनाभिषेके ॥५॥ [illegible] जयति धर्म शांतिं च सर्व
रोगा जे किंचि [illegible] ॥ शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः दो

णाः क्षयांतु नाशं ... लोकाः ॥३॥ अहं तित्थयरमाया शिवादेवी तुम्ह नय
र निवासनी अम्ह शिवं तुम्ह शिवं असिवोपसमं शिवं भवतु स्वाहा ॥४॥ उपसर्गाः क्षयं यां
ति छिद्यंते विघ्नवल्लयः मनः प्रसन्नतामेति पूज्यमाने जिनेसरे ध्यायमाने जिनेसरे
स्तूयमाने जिनेसरे सर्वमंगलमांगल्यं सर्वकल्याणकारणं प्रधानं सर्वधर्माणां जैनं ज
यति शासनं ॥७॥ इति श्री बृहत् शांति स्तोत्रं ॥ ८ ॥ शांतिं शांतिनिशांतं शांतं शांता
शिवं नमस्कृत्य स्तोतुः शांतिनिमित्तं मंत्रपदैः शांतये स्तौमि ॥१॥ ॐमिति निश्चितवचसे
नमोनमो भगवतो अर्हते पूजां शांतिजिनाय जयवते यशस्विने स्वामिने दमिनां ॥२
॥ सकलातिशेषकमहा संपत्तिसमन्विताय सस्याय त्रैलोक्यपूजिताय च नमोन
मः शांतिदेवाय ॥३॥ सर्वामरससमूह स्वामिकसंपूजिताय निजताय भुवनजन
पालनोद्यततमाय सततं नमस्तस्मै ॥४॥ सर्वदुरितौघनाशनकराय सर्वाशिवप्रश
मनाय दुष्टग्रहभूतपिशाच शाकिनीनां प्रमथनाय ॥५॥ यस्येति नाममंत्र प्रधानवा
क्योपयोगकृततोषा विजया कुरुते जनहित मति च नुता नमत तं शांतिं ॥६॥ भवतु न १५

मस्ते भगवती विजये सुजये परापरैरजिते अपराजिते जगत्यां जयतीति जयावहे भवति ॥
॥ सर्वस्यापि च संघस्य भद्रकल्याणमंगलप्रददे साधूनां च सदा शिवतुष्टिपुष्टिप्रदे जीया
त ॥८॥ भव्यानां कृतसिद्धे निर्वृतिनिर्वाणजननि सत्वानां अभयप्रदाननिरते नमोस्तु
स्वस्तिप्रदे तुभ्यं ॥९॥ भक्तानां जंतूनां शुभावहे नित्यमुद्यते देवि सम्यग्दृष्टीनां धृतिरति
मतिबुद्धिप्रदानाय ॥१०॥ जिनशासननिरतानां शांतिनतानां च जगति जनतानां श्रीसंपत्
कीर्तियशो वर्द्धिनि जयदेवि विजयस्व ॥११॥ सलिलानलविषविषधरदुष्टग्रहराजरोग
रणभयतः राक्षसरिपुगणमारी चौरेतिश्वापदादिभ्य ॥१२॥ अथ रक्ष रक्ष सुशिवं कुरु कु
रु शांतिं च कुरु कुरु सदेति तुष्टिं कुरु कुरु पुष्टिं कुरु कुरु स्वस्तिं च कुरु कुरुत्वं ॥१३॥ भग
वति गुणवति शिवशांति तुष्टि पुष्टि स्वस्तीह कुरु कुरु जनानां ॐ मिति नमो नमो ह्रां ह्रीं ह्रूं
ह्रः यः क्षः ह्रीं फट् फट् स्वाहा ॥१४॥ एवं यन्नामाक्षर पुरस्परं संस्तुता जयादेवी कुरुते 16
शांतिनिमित्तं नमो नमः शांतये तस्मै ॥१५॥ इति पूर्वसूरिदर्शितमंत्रपदविदर्भितः स्तव
शांतेः सलिलादिभयविनाशी शांत्यादीकरश्च भक्तिमतां ॥१६॥ यश्चैनं पठति सदा

श्रेणोतिसाचय्यनिवाथिथार्योगं सद्दिशांतपदं आयात् सूरिश्रीमानदेवश्च ॥१७॥ उपस
र्गाः क्षयं यांति छिद्यंते विघ्नवल्लयः। मनः प्रसन्नतामेति पूज्यमाने जिनेसरे ध्यायमाने जिने
सरे स्तूयमाने जिनेसरे सर्वमंगलमांगल्यं सर्वकल्याणकारणं प्रधानं सर्वधर्माणां जैनं
जयति शासनं ॥१९॥ इतिश्री लघुशांतिसंपूर्ण ॥१९॥ इतिश्री सप्तस्मरणानि समा
प्तानि ॥ ऐर्द॥ परमेष्ठिनमस्कारं सारं नवपदात्मकं आत्मरक्षाकरं वज्र पंजराभं स्मरा
म्यहं ॥१॥ ॐनमो अरिहंताणं शिरस्कं शिरसि स्थितं ॐनमो सिद्धाणं मुखे मुखपटं वरं
॥२॥ ॐनमो आयरियाणं अंगरक्षातिशायिनी ॐनमो उवज्झायाणं आयुधं हस्त
योर्दृढं ॥३॥ ॐनमो लोए सव्वसाहूणं मोचके पादयोः शुभे। एसो पंचनमुक्कारो शिला
वज्रमयी तले ॥४॥ सव्वपावप्पणासणो वप्रो वज्रमयो बहिः मंगलाणं च सव्वेसिं स्वा
दिरंगारखातिका ॥५॥ स्वाहांतं च पदं ज्ञेयं पढमं हवइ मंगलं वप्रोपरि वज्र
मयं पिधानं देहरक्षणे ॥६॥ महाप्रभावा रक्षेयं क्षुद्रोपद्रवनाशिनी परमेष्ठिपदोद्भूता
कथिता पूर्वसूरिभिः ॥७॥ यश्चैवं कुरुते रक्षां परमेष्ठिपदैः सदा तस्य न स्याद्भयं व्या १६

धिराधिश्चापि कदाचन ॥८॥ इतिश्री आत्मरक्षास्तवनं ॥८॥ ऐर्द॥ नमस्ते शारदादे
वि काश्मीरपुरवासिनी त्वामहं प्रार्थये नाथे विद्यादानं प्रदेहि मे ॥१॥ प्रथमं भारती नाम
द्वितीयं च सरस्वती तृतीयं शारदादेवी चतुर्थं हंसगामिनी ॥२॥ पंचमं विदुषां माता
षष्ठं वागेश्वरी तथा कुमारी सप्तमं प्रोक्ता अष्टमं ब्रह्मचारिणी ॥३॥ नवमं त्रिपुरादेवी
दशमं ब्राह्मणी तथा एकादशं तु ब्रह्माणी द्वादशं ब्रह्मवादिनी ॥४॥ वाणी त्रयोदशं
नाम भाषा चैव चतुर्दशं पंचदशं श्रुतदेवी षोडशं गौर्निगद्यते ॥५॥ एतानि श्रुतना
मानि प्रातरुत्थाय यः पठेत् तस्य संतुष्यते देवी शारदा वरदायिनी ॥६॥ इतिश्री भा
रतीस्तोत्रं ॥८॥ ऐर्द॥ श्रीइंद्रभूतिं वसुभूतिपुत्रं पृथ्वीभवं गौतमगोत्ररत्नं स्तुवंति
देवासुरमानवेंद्रा स गौतमो यच्छतु वांछितं मे ॥१॥ श्रीवर्द्धमानात्त्रिपदीमवाप्य मुहूर्त
मात्रेण कृतानि येन अंगानि पूर्वाणि चतुर्दशापि स गौतम ॥२॥ श्रीवीरनाथेन पुरा प्र
णीतं मंत्रं महानंदसुखाय यस्य ध्यायंत्यमी सूरिवराः समग्राः स गौतम ॥३॥ यस्याभिधा
नं मुनयोपि सर्वे गृह्णंति भिक्षाभ्रमणस्य काले मिष्टान्नपानांबरपूर्णकामाः स गौतम॥

॥४॥ अष्टापदाद्रौ गगने स्वशक्त्या ययौ जिनानां पदवंदनाय निशम्यतीर्थातिशयं सुरे
भ्यः सगौ०॥५॥ त्रिपंचसंख्याशततापसानां। तपःकृशानामपुनर्भवाय अक्षीणलब्ध्या
परमान्नदाता सगौ०॥६॥ सदक्षिणं भोजनमेव देयं साधर्मिकं संघसपर्ययैव कैवल्य
वस्त्रं प्रदद्दौ मुनीनां सगौ०॥७॥ शिवं गतेभर्तरि वीरनाथे युगप्रधानत्वमहैवमत्वा प
हाभिषेको विदधे सुरेंद्रै सगौ०॥८॥ श्रीगौतमस्याष्टकमादरेण प्रबोधकाले मुनिपुं
वाये पठंति ते सूरिपदं च देवा नंदं लभंते नितरां क्रमेण॥९॥ इति श्री गौतमस्तवनं॥
संवत १८०१ वर्षे मिती चैत्रसुदि १ दिने रविवासरे लिपिकृतं जीमविजय मेदयामे॥